# SK-101 कठोपनिषत् शाङ्करभाष्योपेता

कालावधिः - द्वे होरे　　　　दिनाङ्कः १९ डिसेम्बर् २०२३　　　　अङ्काः - 50

---

A) **अधः यथेष्टं पञ्च मन्त्रान् पूरयत।** **1x5=5**

1) येयं प्रेते विचिकित्सा........॥
2) सर्वे वेदा यत् .........॥
3) आत्मानं रथिनं...........॥
4) पराचः कामाननुयन्ति.....॥
5) ऊर्ध्वं प्राणम्....॥
6) भयादस्याग्निस्... ॥
7) मृत्युप्रोक्तां नचिकेतोऽथ.... ॥

B) **अधस्ताद् यथेच्छं पञ्च प्रश्नान् समाधत्त।** **1x5=5**

1) कठोपनिषदः विषयः कः ?
2) कठोपनिषदि पितापुत्रयोः आख्यायिका किमर्था ?
3) आत्मा अणीयान् कथम् ?
4) बुद्धेरात्मा महान् परः इत्यत्र महानात्मा कः ?
5) यदेवेह तदमुत्र इति मन्त्रस्य वाक्यार्थः कः ?
6) ह॒ँसः शुचिशत् इति मन्त्रस्य वाक्यार्थः कः ?
7) तमात्मस्थं येऽनुपश्यन्ति धीराः इत्यत्र अनुपश्यन्ति इत्यस्य कः अर्थः ?

C) **अधःस्थितेषु यथास्पृहं पञ्च प्रश्नान् भाष्यदिशा समाधत्त।** **3x5=15**

1) सस्यमिव मर्त्यः पच्यते सस्यमिवाजायते पुनः इति मन्त्रभागस्य किं तात्पर्यम् ?
2) दन्द्रम्यमाणाः परियन्ति मूढाः इत्यस्य कः अर्थः ?
3) तद्विष्णोः परमं पदम् इत्यस्य कोऽर्थः ?

4) भगवत्पादानां मते केन मन्त्रभागेन क्षणभङ्गवादो निरस्तः ?

5) अस्य विस्रंसमानस्य इत्यादिमन्त्रे पुनरुक्तिः कथं निवार्यते ?

6) षष्ठी वल्ली कुत आरभ्यते ?

7) "तयोर्ध्वमायन्नमृतत्वमेति" व्याख्यात।

D) **निम्नलिखितेषु यथाभीष्टं त्रीन् यथाभाष्यं समाधत्त।** **5x3=15**

1) ओंकारमाहात्म्यम् उपवर्णयत।

2) विज्ञानसारथेः विषये लिखत।

3) "पराञ्चि खानि व्यतृणत् स्वयम्भूः" इति मन्त्रभागं विवृणुत।

4) शरीरस्य पुरसंपत्तिं दर्शयत ?

5) इहैव आत्मनो दर्शनं सम्पाद्यम् इति कुतः प्रेर्यते ?

E) **नीचैः दत्तेषु अनुप्रियम् एकम् अनुबध्नीत।** **10x1=10**

1) नचिकेतसा कृतं प्रलोभनतिरस्कारम् उपवर्णयत।

2) देहादिसंघातव्यतिरिक्तः आत्मा कथं सिध्यति ?

3) संसारवृक्षं भगवत्पादभाष्यस्वारस्येण उपवर्णयत।

***

## SK-102 ईशमुण्डकोपनिषदौ शाङ्करभाष्यसहिते

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) द्वादशसु दश समाधत्त। 1x10=10**

1) श्रुतिः गुरुशिष्यपरम्परां कथं श्रावयति?
2) अग्निशब्दस्य द्युलोकार्थे का श्रुतिः प्रमाणभूता?
3) अविद्यादिदोषाः के?
4) ऋचः किं लक्षणम्?
5) भूतयोनिशब्दे योनिशब्देन कस्य ग्रहणम्?
6) कानि इष्टकर्माणि?
7) पुरुषशब्दस्य निर्वचनं किम्?
8) निर्वेदशब्दस्य कः अर्थः?
9) अष्टादश यज्ञनिर्वर्तकाः के?
10) "द्वाविमावथ" इत्यादिश्लोकं पूरयत।
11) "विद्यां चाविद्यां च" इत्यस्मिन् श्लोके विद्याशब्देन कस्य ग्रहणम्?
12) आत्मयाजिनः के?

**B) पञ्चसु त्रीन् समाधत्त। 3x3=9**

1) विद्यायाः परापरभेदविषयिणीं पूर्वपक्षाशङ्कामुक्त्वा समाधत्त।
2) "प्रणवो धनुः" इत्यादिमन्त्रार्थं व्याख्यात।
3) "दर्शनमात्रं हि तस्य प्रेरयितृत्वं राजवत्" इति भाष्यपङ्क्तिं विवृणुत।
4) सन्न्यासनिष्ठायाः ब्रह्मविद्याया एव मोक्षसाधनत्वं कथम्?
5) ज्ञानप्रसादशब्दार्थं व्याख्यात।

C) **चतुर्षु त्रीन् समाधत्त।** **2x3=6**

1) तपसा चीयते…
2) इष्टापूर्तं मन्यमाना…
3) न तत्र सूर्यो…
4) स यो ह वै…

D) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) “ईशा वास्यम्“ इत्यादिमन्त्रं पूरयित्वा तदर्थं यथाभाष्यं व्याख्यात।
2) ईशोपनिषद्भाष्यस्यान्तिमभागे “अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते“ इतीमं श्लोकमाधारीकृत्य भाष्यकाराणां विचारं विवृणुत।
3) “दिव्यो ह्यमूर्तः” इत्यादिमन्त्रं पूरयित्वा तदर्थं यथाभाष्यं विशदयत।
4) “प्राणो ह्येष“ इत्यादिमन्त्रं पूरयित्वा तदर्थं यथाभाष्यं व्याख्यात।
5) “तपःश्रद्धे ये” इत्यादिमन्त्रं पूरयित्वा तदर्थं यथाभाष्यं व्याख्यात।

E) **द्वयोरेकं समाधत्त।** **10x1=10**

1) “परीक्ष्य लोकान् कर्मचितान्” इत्यादिमन्त्रं पूरयित्वा यथाभाष्यं सविस्तरं व्याख्यानं कुरुत।
2) ईशावास्योपनिषदि वर्णितौ ज्ञानकर्ममार्गौ मन्त्रसमुल्लेखपुरःसरं विवृणुत।

***

RKMVERI/DSP/MAIS/20-25/D2023/SK-103

## SK-103 छान्दोग्योपनिषत् (६,७,८)

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) एकेन वाक्येन पदेन वा उत्तरत। 1x10=10**

1) षष्ठाध्यायः किमर्थमारभ्यते?
2) ब्रह्मबन्धुशब्दार्थः कः?
3) ता आप ऐक्षन्त इत्यत्र अचेतनस्येक्षणं कथं युज्यते?
4) भूतानां बीजानि कति, कानि च तानि?
5) तेजसः अणिष्ठः भागः कः?
6) अस्थि इति कस्मादुत्पद्यते?
7) नवकृत्वोपदिष्टं वाक्यं किम्?
8) प्रजाः सति सम्पद्यापि वयं सति सम्पद्यामहे इति न विदुः इत्यत्र कः दृष्टान्तः?
9) त्रयी इति केषां समाख्या?
10) विज्ञानं वाव ध्यानाद्भूयः इत्यत्र विज्ञानं नाम किम्?
11) बलं वाव विज्ञानाद्भूयः इत्यत्र कीदृशं बलं विवक्षितम्?
12) अहरहः प्रजाः सुषुप्तौ क्व गच्छन्ति?

**B) सप्तसु पञ्च समाधत्त। 3x5=15**

1) गुरुकुलात् श्वेतकेतुः कथं प्रत्यागतः?
2) तदैक्षत इति वाक्यार्थं विवृणुत।
3) भूतानां बीजानि कानीति समन्त्रकानि प्रदर्शयत।
4) अन्नमयं मनः कथमिति निरूपयत।
5) प्राणानाम् अम्मयत्वं प्रदर्श्य आपस्त्रेधा कथं विधीयन्ते निरूपयत।
6) चोरराजपुरुषदृष्टान्तं व्याख्यात।

7) सर्वव्यापकं भूमा, निरूपयत।

C) **पञ्चसु त्रीणि समाधत्त।** **5x3=15**

1) दृष्टान्तपूर्वकम् एकविज्ञानेन सर्वविज्ञानं प्रतिपादयत।

2) मधुदृष्टान्तं नदीदृष्टान्तं च सप्रसंगं व्याख्यात।

3) गन्धारपुरुषवृत्तान्तेन गुरोः महात्म्यं वर्णयत।

4) आकाशो वै नाम नामरूपयोर्निर्वहिता इति मन्त्रं यथाभाष्यं व्याख्यात।

5) महावैनाशिकपक्षं दर्शयित्वा निषेधत।

D) **एकम् यथाग्रन्थं समाधत्त।** **10x1=10**

1) दहरपुण्डरीके ब्रह्मोपासनं तत्फलञ्च निगमयत।

2) सदेव सोम्येदमग्र आसीदिति वाक्यार्थं यथाभाष्यं गमयत।

***

RKMVERI/DSP/MAIS/19-24/D2023/SK-108

## SK-108 प्रश्नोपनिषत्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **एकेन वाक्येन पदेन वा उत्तरत।** **1x10=10**

1) प्रश्नोपनिषद्ब्राह्मणं कस्यार्थस्य विस्तारं करोति?
2) ब्रह्मपरा इत्यस्य कः अर्थः?
3) कबन्धी कः?
4) संवत्सरप्रजापतेः अयने के?
5) पितृयानोपलक्षितः कः?
6) पञ्चपादमित्यत्र पञ्च ऋतवः कयोः एकीकरणेन कल्प्यन्ते?
7) विदुषः स्वापः कीदृशं हवनमित्युच्यते?
8) ओङ्कारोपासनाविषयकः प्रश्नः केन कृतः?
9) ओङ्कारस्य द्विमात्त्राविभागज्ञः कं लोकं जयति?
10) प्रज्ञानं ब्रह्मेति वाक्यं कस्यामुपनिषदि वर्तते?
11) कौसल्यः इत्यस्य कः अर्थः?
12) भारद्वाजं प्रति षोडशकलपुरुषविषयकः प्रश्नः केन कृतः?

B) **सप्तसु पञ्च समाधत्त।** **3x5=15**

1) मक्षिकामधुकरदृष्टान्तेन प्राणश्रैष्ठ्यं गमयत।
2) अरा इव रथनाभाविति मन्त्रेण प्राणस्य सर्वाश्रयत्वं वर्णयत।
3) हृदि ह्येष आत्मा इति मन्त्रेण लिंगदेहस्थितिं वर्णयत।
4) सुषुप्तौ प्राणानां गार्हपत्यादिरूपत्वं वर्णयत।
5) मासादिषु प्रजापतित्वदृष्टिप्रकारं वर्णयत।
6) “तद्ये ह वै तत्प्रजापतिव्रतं चरन्ति” इत्यादि मन्त्रोक्तं प्रजापतिव्रतफलं वर्णयत।

7) तेषामसौ विरजो ब्रह्मलोकः इति मन्त्रेण उत्तरमार्गानुगामिनां गतिं वर्णयत।

C) **पञ्चसु त्रीणि समाधत्त।** **5x3=15**

1) प्राणप्रधानताबोधिकामाख्यायिकां यथोपनिषद् गमयत।

2) स्वप्नदर्शनप्रकारं वर्णयत।

3) विश्वरूपं हरिणमित्यादि मन्त्रं व्याख्यात।

4) ओङ्कारोपासनफलं यथोपनिषत् वर्णयत।

5) ओङ्काराभिध्यानविषयकं शैब्यप्रश्नं यथाभाष्यं विवृणुत।

D) **एकम् यथाग्रन्थं समाधत्त।** **10x1=10**

1) एष हि द्रष्टा इति मन्त्रोक्तप्रक्रियया सुषुप्तौ जीवब्रह्मणोः अभेदं गमयत।

2) उपनिषत्प्रतिपादितप्रकारेण ओङ्कारस्य मात्रात्रयविशेषतां गमयत।

***

## SK-125 श्रीमद्भगवद्गीता(२,३,४)

कालावधिः-होराद्वयम् पूर्णाङ्काः-50

---

A) **द्वादशसु दश समाधत्त।** **1x10=10**

1) कैः गुणैः सदा सम्पन्नः भगवान्?
2) किमर्थमर्जुनं प्रत्येवोपदेशः कृतो भगवता?
3) "नानुशोचन्ति पण्डिताः" कोऽर्थः?
4) को नाम योगक्षेमः?
5) शास्त्रमात्मनि कथं प्रमाणत्वं भजते?
6) कयोः वशं नागच्छेत्?
7) के कर्मभिः मुच्यन्ते?
8) केन संसिद्धिमास्थिता जनकादयः?
9) कर्मसमुद्भवः कः?
10) मिथ्याचारो नाम कः?
11) किमर्थं परमात्मा प्रतियुगं सम्भवति?
12) कुत्र कर्मफलसिद्धिः क्षिप्रं भवति?

B) **सप्तसु पञ्च समाधत्त।** **3x5=15**

1) या निशा सर्वभूतानाम्।
2) ध्यायतो विषयान्पुंसः।
3) समत्वं योग उच्यते।
4) सदृशं चेष्टते स्वस्याः।
5) कर्मणैव हि संसिद्धिम्।
6) यदृच्छालाभसन्तुष्टः।

7) चातुर्वर्ण्यं मया सृष्टम्।

C) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) चतुर्थाध्यायदिशा सन्यासिनः कर्माभावविचारः।

2) तृतीयाध्यायदिशा कर्मयोगविचारः।

3) ज्ञानकर्मसमुच्चयविचारः।

4) "नासतो विद्यते" इत्यस्य भाष्यार्थः।

5) स्थितप्रज्ञलक्षणम्।

D) **द्वयोरेकं समाधत्त।** **10x1=10**

1) गीतोपोद्घातभाष्यं यथाग्रन्थं संक्षिपत।

2) चातुर्वण्यसृष्टिविचारं सप्रमाणं विचार्य "ब्रह्मार्पणं ब्रह्म हविरिति" भाष्यार्थं विस्तारयत।

***

RKMVERI/DSP/MAIS/20-25/D2023/SK-132

# SK-132 ब्रह्मसूत्रे प्रथमाध्याये तृतीयचतुर्थपादौ शाङ्करभाष्योपेतौ

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **द्वादशसु दश समाधत्त।** **1x10=10**

1) कः स्फोटः?
2) अक्षराधिकरणस्य संशय कः?
3) मुक्तैः उपसृप्यं ब्रह्मैव इत्यत्र श्रुतिप्रमाणं किम्?
4) भूमाधिकरणस्य विषयवाक्यं किम्?
5) पूर्वपक्षिमते प्राणः भूमा कस्मात्?
6) ब्रह्मसूत्रे प्रधमाध्याये तृतीयपादस्य नाम किम्?
7) “विरोधः कर्मणीति"...इत्यादिसूत्रं पूरयत।
8) सिद्धान्ते दहरशब्दार्थः कः?
9) ईक्षतिकर्माधिकरणस्य विषयवाक्यं किम्?
10) सूक्ष्मं तु तदर्हत्वात् इत्यत्र सूक्ष्मं नाम किम्?
11) ज्योतिरधिकरणस्य विषयवाक्यं किम्?
12) "ज्ञेयत्वावचनाच्च" इति सूत्रं कस्मिन् अधिकरणे वर्तते?

B) **सप्तसु पञ्च समाधत्त।** **3x5=15**

1) नानुमानमतच्छब्दात्।
2) ज्योतिषि भावाच्च।
3) अन्यभावव्यावृत्तेश्च।
4) अक्षरमम्बरान्तधृतेः।
5) दहर उत्तरेभ्य इत्यस्य पूर्वपक्षमतम्।
6) अन्यार्थश्च परामर्शः।

7) सूक्ष्मं तु तदर्हत्वात्।

C) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) द्युभ्वाद्यायतनं स्वशब्दात् इति सूत्रस्य सिद्धान्तिमतं प्रतिपादयत।

2) अक्षराधिकरणम्।

3) ईक्षतिकर्मव्यपदेशात्सः इति सूत्रं विशदयत।

4) अनुकृतेस्तस्य च।

5) कम्पनात्।

D) **द्वयोरेकं समाधत्त।**

1) भूमाधिकरणम् विवक्षितार्थं संक्षिपत।

2) कम्पनाधिकरणम्।

***

RKMVERI/DSP/MAIS/20-25/D2023/SK-133

# SK-133 ब्रह्मसूत्रभाष्यम्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **अत्र द्वादशसु दश समाधत्त।** **1x10=10**

1) “आपः” सूत्रार्थः कः?
2) “तेजोऽतस्तथाह्याह” सूत्रार्थः कः?
3) चराचरव्यपाश्रयस्तु… पूरयत।
4) “अस्ति तु”- कोऽर्थः?
5) वैषम्यनैर्घृण्ये… पूरयत।
6) “यथा च प्राणादि”- कोऽर्थः?
7) असामञ्जस्यम् कतिधा?
8) अचिन्त्याः खलु ये भावाः…पूरयत।
9) अभिमानिव्यपदेशः कथम् ?
10) “इतरेषां चानुपलब्धेः”- सूत्रार्थः कः?
11) सिद्धिः किमपेक्षा ?
12) स्मृत्यनवकाशदोषप्रसङ्गः कुतो न?

B) **सप्तसु पञ्च समाधत्त।** **3x5=15**

1) “न तु दृष्टान्तभावात्“- व्याख्यात।
2) “इतरेषां चानुपलब्धेः”- व्याख्यात।
3) “देवादिवदपि लोके”- व्याख्यात।
4) “सर्वधर्मोपपत्तेश्च”- व्याख्यात।
5) “पयोम्बुवच्चेत्तत्रापि”- व्याख्यात।
6) प्रतिज्ञाहानिम् उपपादयत।

7) तेजस उत्पत्तिं निरूपयत।

C) **अधस्तात् पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) पृथिव्यधिकाराधिकरणं लिखत।

2) ज्ञाधिकरणं लिखत।

3) वियदधिकरणपूर्वपक्षं लिखत।

4) सांख्यमते विप्रतिषेधमुपपादयत।

5) वैषम्यनैर्घृण्याधिकरणपूर्वपक्षं लिखत।

D) **नीचैः द्वयोरेकं समाधत्त।** **10x1=10**

1) वियदधिकरणं निरूपयत।

2) प्रयोजनवत्वाधिकरणं लिखत।

***

# SK-135 ब्रह्मसूत्रे तृतीयाध्याये द्वितीयतृतीयपादौ शाङ्करभाष्योपेतौ

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **द्वादशसु दश समाधत्त।** **1x10=10**

1) पराधिकरणस्य प्रतिपाद्यः विषयः कः?
2) "नेति नेतीति" श्रुतेः तात्पर्यं किम्?
3) ब्रह्मणः सविशेषता निर्विशेषता च कीदृशी?
4) ब्रह्मवाचकस्य सेतु-शब्दस्य कोर्थः?
5) जैमिनिनये कर्मफलदाता कः?
6) सुषुप्ति-अवस्था कीदृशी?
7) प्रातिभासिकसत्ता कस्य? पुनः तस्य कर्ता कः?
8) जीवस्य सुषुप्तिस्थानं किम्?
9) कर्मानुस्मृत्यधिकरणस्य प्रतिपाद्यः विषयः कः?
10) ब्रह्म कथं निर्विशेषम्?
11) जीव-परमात्मनोः भेदः कीदृशः?
12) निर्विशेषश्रुतिवाक्यानां कुत्र तात्पर्यम्?

B) **सप्तसु पञ्च समाधत्त।** **3x5=15**

1) न स्थानतोऽपि परस्योभयलिङ्गम् सर्वत्र हि।
2) मुग्धेऽधर्मसंपत्तिः परिशेषात्।
3) मायामत्रं तु कात्स्र्न्येनानभिव्यक्तस्वरूपत्वात्।
4) फलमतः उपपत्तेः।
5) परमतः सेतुन्मानसम्बन्धभेदव्यपदेशः।

6) धर्मं जैमिनिरत एव।

7) जीव-ब्रह्मणोः औपाधिकभेदविषये युक्तिं प्रदर्शय।

C) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) मुग्धाधिकरणं संक्षेपेण व्याख्यात।

2) पराधिकरणस्य पूर्वपक्षं व्याख्यात।

3) प्रकृतैतावत्त्वाधिकरणस्य सिद्धान्तपक्षं लिखत।

4) कर्मानुस्मृत्यधिकरणम् संक्षेपेण व्याख्यात।

5) तदभावाधिकरणं संक्षेपेण व्याख्यात।

D) **द्वयोरेकं समाधत्त।**

1) उभयलिङ्गाधिकरणम्।

2) सन्ध्याधिकरणम्।

***

## SK-151 पञ्चदश्याम् 1-5 अध्यायाः

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **द्वादशसु दश समाधत्त।** **1x10=10**

1) किं निदिध्यासनम्।
2) सप्तान्नानि कानि।
3) योगवित्तमाः निर्विकल्पसमाधिं किं प्राहुः।
4) को जीवः।
5) चोद्यपरिहारौ कया भाषया कर्तव्यौ।
6) वृत्तिभेदेन अन्तःकरणस्य द्वैविध्यं किम्।
7) तत्पादाम्बुरुहद्वन्द्व-शब्दस्थतच्छब्देन किं व्यपदिष्टम्।
8) अग्नेः के धर्माः सन्ति।
9) पुत्राध्ययनदृष्टान्तेन किं सिषाधयिषितम्।
10) गौडाचार्याः योगिनां कुत्र भयं व्यपदिशन्ति।
11) विद्यारण्यमुनेः पञ्चदश्यतिरिक्तस्य ग्रन्थत्रयस्य नाम लिखत।
12) पञ्चदश्याः चतुर्थप्रकरणस्य किं नाम।

B) **सप्तसु पञ्च समाधत्त।** **3x5=15**

1) धर्ममेघसमाधिं वर्णयत।
2) पञ्चदशीदिशा अथर्ववेदस्थं महावाक्यं व्याख्यात।
3) धीरो मुमुक्षुः किमर्थं बहून् शब्दान् नानुध्यायेत्।
4) नद्यां कीटदृष्टान्तेन ग्रन्थकृता किं साधितम्।
5) अन्नमयकोशस्य अनात्मत्वं प्रतिपादयत।
6) समाधावन्वयव्यतिरेकप्रकारं व्याख्यात।

7) पञ्चदशीदिशा यजुर्वेदस्थं महावाक्यं व्याख्यात।

C) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) मङ्गलश्लोकं व्याख्यात।

2) 'अवेद्योऽप्यपरोक्षोतः' इत्यादिश्लोकं सम्पूर्य व्याख्यात।

3) महावाक्यलक्षितः आत्मा सविकल्पः उत निर्विकल्पः इति विचारयत।

4) अन्नमयकोश-प्राणमयकोशयोः अनात्मत्वं प्रतिपादयत।

5) पञ्चदशीदिशा समाधिं प्रतिपादयत।

D) **द्वयोरेकं समाधत्त।** **10x1=10**

1) ईश्वरस्य जगत्स्रष्टृत्वं श्रुतिभिः कथं प्रतिपादितमिति पञ्चदशीदिशा प्रतिपादयत।

2) पञ्चदश्यनुसारं जीवेश्वरमायानां स्वरूपं भेदांश्च वर्णयत।

***

## SK-164 अर्थापत्तितःआन्तं यावत्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **द्वादशसु दश समाधत्त।** **1x10=10**

1) अनुपलब्धिप्रमाणलक्षणं लिखत।
2) तितिक्षा नाम का?
3) अर्थापत्तिप्रमाणलक्षणं लिखत।
4) अर्थापत्तिप्रमाणं किं भवति, अर्थापत्तिप्रमा च का भवति।
5) वेदान्तनये केषां प्रमाणानां व्यावहारिकतत्वावेदकत्वरूपं प्रामाण्यम्?
6) पारमार्थिकत्त्वावेदकं प्रमाणं किम्?
7) उपरतिः नाम का?
8) वायोः कति गुणाः, के च ते।
9) आरोपे सति निमित्तानुसरणमिति न्यायः कुत्र उदाहृतः?
10) दुःखं कस्य स्वभावधर्मः नास्ति?
11) अपां कति गुणाः, के च ते।
12) सातिशयं सुखं किं भवति।

B) **सप्तसु पञ्च समाधत्त।** **3x5=15**

1) अर्थापत्तेः द्वैविध्यं निरूपयत।
2) ब्रह्मणि प्रपञ्चभेदाभ्युपगमेऽद्वैतविरोधः कुतो नेति लिखत।
3) व्यावहारिकतत्त्वावेदकत्वं पारमार्थिकतत्त्वावेदकत्वं च प्रामाण्यं प्रतिपादयत।
4) श्रवणमनननिदिध्यासनानां स्वरूपं लिखत।
5) अभावप्रतीतेः प्रत्यक्षत्वे अपि तत्करणत्वस्य अनुपलब्धेर्मानान्तरत्वात् इति विषयं निरूपयत।

C) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) अर्थापत्तिस्वीकारेण व्यतिरेकव्याप्तिं निरस्यत।

2) योग्यानुपलब्धिरित्यत्र कः समासः स्वीकर्तव्यः इति युक्तिपूर्वकं लिखत।

3) अभावचातुर्विध्यं निरूपयत।

4) संक्षेपेणानुपलब्धेर्मानान्तरत्वं साधयत।

5) जीवन्मुक्तस्वरूपं वर्णयत।

D) **द्वयोरेकं समाधत्त।** **10x1=10**

1) ब्रह्मणः स्वरूपलक्षणं तटस्थलक्षणं च यथाग्रन्थं प्रतिपादयत।

2) श्रवणनिदिध्यासनयोः कारणत्वे विवरणभामतीकारयोः मतं व्यवस्थापयत।

***

# SK-167 सिद्धान्तलेशसङ्ग्रहे प्रथमपरिच्छेदः

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

## A) एकेन वाक्येन पदेन वा उत्तरत। 1x10=10

1) वेदान्तश्रवणं ब्रह्मसाक्षात्कारहेतुरित्यत्र किं प्रमाणं नास्ति?
2) प्रकटार्थकारः कः?
3) सहकारिवैकल्यं नाम किम्?
4) अवघातन्यायः केन यागेन सम्बद्धः?
5) विधयः कतिसंख्याकाः, के च ते?
6) कीदृशं मनः आत्मज्ञाने करणमिति भाष्यकाराभिप्रायः?
7) शब्दात् अपरोक्षं ज्ञानं जायते इति केषां मतम्?
8) अपूर्वविधेः लक्षणं किम् ?
9) गुरुमुखाधीनाध्ययनफलं किम् ?
10) संक्षेपशारीरकमते कीदृशं ब्रह्म जगदुपादानं वर्तते?
11) मायायाः जगत्कारणत्ववादिनी श्रुतिः का?
12) माया द्वारकारणम् इति केषां मतम्?

## B) सप्तसु पञ्च समाधत्त। 3x5=15

1) अधिगतभिदा इत्यादि मङ्गलश्लोकं व्याख्यात।
2) सिद्धान्तलेशसङ्ग्रहस्य प्रतिज्ञावाक्यं विचारयत।
3) नियमविधेः परिसंख्याविधेश्च वैलक्षण्यं प्रतिपादयत।
4) वेदान्तश्रवणं ब्रह्मसाक्षात्कारहेतुरिति व्याप्तेः व्यभिचारं प्रकटार्थकाररीत्या दर्शयत।
5) अवघातस्य दृष्टं फलं सोदाहरणं सप्रसंगं व्याख्यात।
6) जुष्टं यदा पश्यति इत्यादि श्रुत्या प्राप्तं पक्षान्तरं किमिति निरूपयत।

7) कौमुदीकारमते ब्रह्मणः तटस्थलक्षणं विचारयत।

C) **पञ्चसु त्रीणि समाधत्त।** **5x3=15**

1) श्रवणे नियमविधिः इति निरूपयत।

2) ब्रह्मणः सर्वज्ञत्वमुपस्थापयत।

3) शाब्दापरोक्षं प्रति श्रवणादीनां त्रयाणामपि नियमविधित्वं प्रतिपादयत।

4) साक्षिस्वरूपं विचारयत।

5) विवर्तपरिणामयोः भेदं विचारयत।

D) **एकम् यथाग्रन्थं समाधत्त।** **10x1=10**

1) चित्रदीपप्रकरणदिशा चित्चातुर्विध्यं निरूपयत।

2) श्रवणे न कोपि विधिरिति मतं स्थापयत।

***

# SK-171 अद्वैतसिद्धिः

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **अत्र द्वादशसु दश समाधत्त।** **1x10=10**

1) मिथ्यात्वस्य सत्यत्वे को दोषः ?
2) किं नाम प्रमाणत्वम् ?
3) विवक्षितं चतुर्थं मिथ्यात्वस्वरूपं किम् ?
4) ज्ञानत्वव्याप्यधर्मेण ज्ञाननिवर्त्यत्वे को दोषः ?
5) द्वितीयमिथ्यात्वस्वरूपं किम् ?
6) दृश्यत्वहेतौ प्रथमद्वितीयविकल्पौ कौ ?
7) प्रपञ्चनिषेधः कीदृशः स्वीकृतः ?
8) किं नाम वृत्तिव्याप्यत्वम् ?
9) फलव्याप्यत्वं किम् ?
10) किं नाम अनिर्वाच्यत्वम् ?
11) गुणादिकं गुण्यादिना... एतदनुमानं लिखत।
12) प्रथममिथ्यात्वद्वितीयविकल्पे के दोषाः ?

B) **सप्तसु पञ्च समाधत्त।** **3x5=15**

1) स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगित्वम् - एतन्निरूपयत।
2) मिथ्यात्वस्य मिथ्यात्वमुपपादयत।
3) घटादेः पक्षसमत्वं स्पष्टयत।
4) संशयस्य विचाराङ्गत्वम् उपपादयत।
5) पक्षतावच्छेदकं किमिति निरूपयत।
6) पञ्चममिथ्यात्वं संक्षिपत।

7) अद्वैतसिद्धेः द्वैतमिथ्यात्वसिद्धिपूर्वकत्वं साधयत।

C) **अधस्तात् पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) ज्ञाननिवर्त्यत्वं परिष्कुरुत।

2) अर्थान्तरसाध्यवैकल्ये स्पष्टयत।

3) आत्मस्वरूपस्य अखण्डधीगोचरत्वं दर्शयत।

4) प्रथममिथ्यात्वे द्वितीयतृतीयविकल्पयोः दोषान् उद्भावयत।

5) सत्यत्वमिथ्यात्वयोः स्वरूपं विस्तरेण प्रदर्शयत।

D) **नीचैः द्वयोरेकं समाधत्त।** **10x1=10**

1) प्रथममिथ्यात्वं संक्षिपत।

2) सद्विविक्तत्वं मिथ्यात्वम् - उपपादयत।

***

# SK-176 तत्त्वप्रदीपिकायां मिथ्यात्वानुमाने हेतुदोषनिरासपर्यन्तम्

कालावधिः - होराद्वयम् | पूर्णाङ्काः - 50

---

A) **अत्र द्वादशसु दश समाधत्त।** **1x10=10**

1) स्वप्रकाशत्वे कति विकल्पाः ?
2) किं नाम ज्ञानाविषयत्वम् ?
3) का अप्रसिद्धविशेषणता ?
4) वेद्यत्वे के विकल्पाः कृताः ?
5) अक्षमा भवतः केयं ……… पूरयत।
6) किं नाम फलव्याप्यत्वम् ?
7) सामान्यतोऽनुमानेन ……..पूरयत।
8) अनुभूतेः स्वप्रकाशत्वसाधकानुमानं किम् ?
9) स्वप्रकाशत्वस्य सामान्यतः प्रसिद्धिः कथम् ?
10) अप्रसिद्धविशेष्यता का ?
11) यद्विपर्यये असमीहित ……….पूरयत।
12) धर्मदीनां योगिप्रत्यक्षविषयत्वं कुतो न ?

B) **सप्तसु पञ्च समाधत्त।** **3x5=15**

1) स्वप्रकाशत्वे द्वितीयतृतीयविकल्पौ प्रदर्शयत।
2) स्वव्यवहारहेतुप्रकाशत्वं विकल्पेन प्रदर्शयत।
3) वेद्यत्वे विकल्पान् विलिख्य तदर्थं स्पष्टयत।
4) अपरोक्षव्यवहृतेः - कारिकार्थं लिखत।
5) व्यवहारबिषयत्वे सति ज्ञानाविषयत्वं - व्याख्यात।
6) यत्राप्यतिशयो दृष्टः - वाक्यमिदं व्याख्यात।

7) वेदत्वे पञ्चमविकल्पं खण्डयत।

C) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) स्वप्रकाशत्वविकल्पान् दर्शयत।

2) सर्वगतत्वं सर्वात्मकत्वञ्च हरेः प्रदर्शयत।

3) स्वप्रकाशत्वलक्षणपूर्वपक्षं लिखत।

4) सामान्यतोऽनुमानं व्याख्यात।

5) आनन्दो विषयानुभवो नित्यत्वञ्च - व्याख्यात।

D) **द्वयोरेकं समाधत्त।** **10x1=10**

1) स्वप्रकाशत्वस्य सिद्धान्ताभिमतं लक्षणं समर्थयत।

2) स्वप्रकाशानुभूतौ प्रमाणमुपन्यस्यत।

***

# SK-201 सिद्धान्तकौमुदी पञ्चसन्ध्यन्ता

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) द्वादशसु दश समाधत्त।** **1x10=10**

1) प्रत्याहारः इति कीदृशः शब्दः।
2) पूर्वात्रासिद्धम् इत्यस्य अधिकारत्वे कोऽर्थः।
3) ईदूतौ च सप्तम्यर्थे इति सूत्रे अर्थग्रहणं किमर्थम्।
4) तपरस्य तात्परत्वे किमुदाहरणम्।
5) अप्राप्तविभाषायाः उदाहरणं किम्।
6) तस्यादितः इत्यत्र कस्मिन्नर्थे प्रत्ययः।
7) उच्चैः इत्यस्य अर्थद्वयं लिखत।
8) मुखनासिकावचनः इत्यत्र कः समासः , कश्च विग्रहः।
9) स्वरितेनाधिकारः इति सूत्रे स्वरितेन इत्यत्र केन सूत्रेण तृतीया।
10) सुप्तिङन्तं पदम् इति सूत्रे अन्तग्रहणेन किं ज्ञायते।
11) ऋॢवर्णयोः इत्यस्य विग्रहं लिखत।
12) ऋणार्णम् इत्यस्य कोऽर्थः।

**B) सप्तसु पञ्च समाधत्त।** **3x5=15**

1) सन्नच्युतः इति रूपं साधयत।
2) विश्वपाभिः इत्यत्र होः ढः इति ढत्वं कुतो न।
3) मयो उञो वो वा इति सूत्रं सोदाहरणं व्याख्यात।
4) उत्थानम् इति रूपं साधयत।
5) तवल्कारादिषु रूपचतुष्टयं प्रतिपादयत।
6) पुना रमते इति प्रयोगस्य सिद्धिप्रक्रिया दर्शनीया।

7) नृन् पाहि इत्यत्र सन्धौ कति रूपाणि इति ससूत्रं व्याख्यात।

C) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) भूवादयो धातवः इति सूत्रं व्याख्यात।

2) तुल्यास्यप्रयत्नं सवर्णम् इति सूत्रं व्याख्यात।

3) अजर्घाः इति रूपं साधयत।

4) हलन्त्यम् इति सूत्रे अन्योन्याश्रयदोषमुद्भाव्य समाधत्त।

5) अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य इति सूत्रं व्याख्यात।

D) **द्वयोरेकं समाधत्त।** **10x1=10**

1) न वेति विभाषा इति सूत्रं व्याख्यात।

2) अतो रोरप्लुतादप्लुते इति सूत्रं व्याख्यात।

***

# SK-205 सिद्धान्तकौमुदी (शब्दाधिकारः)

समयावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **द्वादशसु दश समाधत्त।** **1x10=10**

1) जस्' इत्यत्र जकारस्य इत्संज्ञा केन सूत्रेण ?
2) सर्वादिगणे तुल्यपर्यायस्य समशब्दस्य ग्रहणं कुतः न ?
3) स्वादिष्वसर्वनामस्थाने इति सूत्रेण किं विधीयते ?
4) 'क्रोष्टा' इत्यत्र उपधादीर्घः केन सूत्रेण ?
5) सुसखीशब्दस्य घिसंज्ञा कथम्?
6) औङ् इति कस्य संज्ञा ?
7) प्रियतिसा इत्यस्य विग्रहः कः ?
8) कैय्यटमते वर्षाभूशब्दस्य स्त्रियां सम्बोधने किं रूपम् ?
9) पीलुने इत्यत्र कुतः न पुंवद्भावः ?
10) ज्ञानानि अत्र नुमागमः केन सूत्रेण ?
11) शेषे इत्यस्य कथं मपर्यन्ताच्छेषस्य इत्यर्थः ?
12) चतुर्थीबहुवचने युष्मदस्मदोः परस्य भ्यसः कः आदेशः?

B) **सप्तसु पञ्च समाधत्त।** **3x5=15**

1) कृत्तद्धितसमासश्च इत्यत्र समासग्रहणेन कः नियमः ज्ञापितः? कथम् ?
2) कथं 'दुर्धियः' इत्यत्र यणादेशः ?
3) बहुव्रीहिग्रहणं स्पष्टार्थम्। कथम् ?'
4) अस्माभिः। ससूत्रं रूपं साधयत।
5) वारिणी। ससूत्रं रूपं साधयत।
6) सख्युः। ससूत्रं रूपं साधयत।

7) रामाणाम् । ससूत्रं रूपं साधयत।

C) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) बहुवचने झल्येत्। विवृणुत।

2) यस्मात्प्रत्ययविधिः तदादिप्रत्ययेऽङ्गम्। वर्णयत।

3) द्वन्द्वे च। प्रपञ्चयत।

4) हल्ङ्याप्भ्यो दीर्घात्सुतिस्यपृक्तं हल्। वर्णयत।

5) साम आकम्। विशदयत।

D) **द्वयोरेकं समाधत्त।** **10x1=10**

1. पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु। विवृणुत।
2. त्वमावेकवचने, युवावौ द्विवचने इत्यत्र एकवचनद्विवचनशब्दयोः यौगिकत्वस्वीकारे फलं विवृणुत।

***

RKMVERI/DSP/MAIS/22-27/D2023/SK-209

# SK-209 वैयाकरणसिद्धान्तकौमुद्यां कारकप्रकरणम्।

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) द्वादशसु दश समाधत्त। 1x10=10**

1) धूमाद् अग्निमान् इत्यत्र पञ्चमी कथम्।
2) लिङ्गमात्राधिक्ये प्रथमा इत्यस्य एकम् उदाहरणं लिखत।
3) कृष्णः घटः इत्यत्र कस्मिन् अर्थे कृष्णशब्दात् प्रथमा।
4) लक्ष्म्या सेवितः इत्यत्र केन कर्तुः अभिधानं जातम्।
5) प्रातिपदिकार्थः कः।
6) माषेष्वश्वं बध्नाति अत्र माषाणां कुतो न कर्मसंज्ञा।
7) तथायुक्तं चानीप्सितम् इत्यस्य स्वभाषया अर्थं लिखत।
8) अकर्मकधातुभिः योगे कस्य कस्य कर्मसंज्ञा भवति।
9) अधिपूर्वस्य शीङ्धातोः प्रयोगे आधारस्य का संज्ञा भवति, केन।
10) अनुर्लक्षणे इत्यस्य अर्थं लिखत।
11) कर्मादीनाम् सम्बन्धमात्रविवक्षायां का विभक्तिः भवति।
12) गोषु दुह्यमानासु गतः अत्र सप्तमी केन।

**B) सप्तसु पञ्च समाधत्त। 3x5=15**

1) अभिधानं च प्रायेण तिङ्कृत्तद्धितसमासैः अस्य आशयं लिखत।
2) तमब्ग्रहणं किम्? पयसा ओदनं भुङ्क्ते इत्यस्य तात्पर्यं लिखत।
3) तृतीयार्थे इति सूत्रं व्याख्यात।
4) अकर्तर्यृणे पञ्चमी इति सूत्रं व्याख्यात।
5) त्रिविधः आधारः व्याख्येयः।
6) पराजेरसोढः इति सूत्रं व्याख्यात।

7) प्रातिपदिकार्थसूत्रे वचनग्रहणस्य प्रयोजनं व्याख्यात।

C) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्यनवः इति सूत्रं व्याख्यात।

2) वारणार्थानामीप्सितः इति सूत्रं व्याख्यात।

3) क्रियार्थोपपदस्य च कर्मणि स्थानिनः इति सूत्रं व्याख्यात।

4) क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः इति सूत्रं व्याख्यात।

5) कर्मणा यमभिप्रैति स सम्प्रदानम् इति सूत्रं व्याख्यात।

D) **द्वयोरेकं समाधत्त।** **10x1=10**

1) प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा इति सूत्रस्य विस्तरेण व्याख्या कार्या।

2) अकथितं च इति सूत्रस्य स्वभाषया व्याख्यां कुर्वन्तु।

***

# SK-215 सिद्धान्तकौमुद्याम् एकशेषात्समासाश्रयं यावत्स्त्रीप्रत्ययश्च

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **द्वादशसु दश समाधत्त।** **1x10=10**

1) स्त्रीप्रत्ययेषु तदन्तविधेः ज्ञापकं किम्?
2) उगिदचामित्यादिसूत्रे अज्ग्रहणेन किं नियम्यते?
3) एषा, द्वा एतयोः सपूर्वयोः कथं नेत्त्वम्?
4) बाला इत्यत्र केन ङीप् प्राप्तः?
5) विभाषा सपूर्वस्य इति सूत्रस्य कोऽर्थः?
6) यासुटो ङित्त्वेन किं ज्ञाप्यते?
7) वक्रदण्डौ इत्यत्र एकशेषः केन?
8) पञ्च वृत्तयः काः?
9) हृल्लेखः इत्यत्र को विग्रहः?
10) रेवतिपुत्रः इत्यत्र ह्रस्वः केन?
11) किंराजा इत्यत्र केन टज्-निषेधः?
12) परस्मैपदम् इत्यत्र केन अलुक्?

B) **सप्तसु पञ्च समाधत्त।** **3x5=15**

1) पत्युर्नो यज्ञसंयोगे इति सूत्रं व्याख्यात।
2) उगितश्च इति सूत्रं व्याख्यात।
3) कुरुचरी इति रूपं साधयत।
4) वनो र च इति सूत्रं व्याख्यात।
5) ग्राम्यपशुसङ्घेष्वतरुणेषु स्त्री इति सूत्रं व्याख्यात।
6) द्व्यन्तरुपसर्गेभ्योऽप ईत् इति सूत्रं व्याख्यात।

7) ऋतो विद्यायोनिसम्बन्धेभ्यः इति सूत्रं व्याख्यात।

C) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) उदीचामातः स्थाने यकपूर्वायाः इति सूत्रं व्याख्यात।

2) स्त्रियाम् इति सूत्रं व्याख्यात।

3) इन्द्रवरुणेत्यादिसूत्रं प्रपूर्य सवार्तिकं व्याख्यात।

4) त्यदादीनि सर्वैर्नित्यम् इति सूत्रं व्याख्यात।

5) पृषोदरादीनि यथोपदिष्टम् इति सूत्रं व्याख्यात।

D) **द्वयोरेकं समाधत्त।** **10x1=10**

1) टिड्ढाणञ् इत्यादिसूत्रं प्रपूर्य व्याख्यात।

2) स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् इति सूत्रं व्याख्यात।

***

# SK-227 सिद्धान्तकौमुद्यां कृत्यप्रकरणात् पूर्वकृदन्तप्रकरणं यावत्

कालावधिः - होराद्वयम् | पूर्णाङ्काः - 50

---

A) **द्वादशसु दश समाधत्त।** **1x10=10**

1) प्रणिंसितव्यम् इति प्रयोगे णत्वं केन सूत्रेण विधीयते।
2) शक्यम् इत्यत्रे केन सूत्रेण कः प्रत्ययः
3) राजसूय.....इत्यादिसूत्रं पूरयन्तु।
4) गृहम् इत्यस्य विग्रहं लिखत।
5) गाथकः इत्यत्र केन सूत्रेण कः प्रत्ययः।
6) ग्रामणीः इत्यत्र णत्वं केन।
7) अग्निचित् इत्यत्र केन सूत्रेण कः प्रत्ययः।
8) शीर्णः इत्यत्र निष्ठातस्य नकारादेशः केन सूत्रेण।
9) विद्वान् इति रूपे शतुः वसुरादेशः केन सूत्रेण।
10) जल्पाकः इत्यत्र कः प्रत्ययः।
11) रुप्रत्ययविधायकं सूत्रं किम्।
12) यायावरः इत्यत्र केन सूत्रेण कः प्रत्ययः।

B) **सप्तसु पञ्च समाधत्त।** **3x5=15**

1) अचो यत् इति सूत्रं व्याख्यात।
2) एतिस्तुशास्वृदृजुषः क्यप् इति सूत्रं व्याख्यात।
3) पण्डितमानी इति रूपं साधयन्तु।
4) स्तुत्यः इति रूपं साधयन्तु।
5) उपसर्या काल्या प्रजने इति सूत्रं व्याख्यात।
6) दान्तो वा। धान्तो वा। न च दान्तत्वे निष्ठानत्वम् धान्तत्वे झषस्तथोः इति धत्वं शङ्क्यं

संनिपातपरिभाषाविरोधात् इति पङ्क्तेः आशयं प्रतिपादयन्तु।

7) नमिकम्पि इति रेण युचो बाधे सिद्धे दीपेर्ग्रहणं ज्ञापयति 'ताच्छीलिकेषु वासरूपविधिर्नास्ति' इति प्रायिकमिति पङ्क्तेः आशयं प्रतिपादयन्तु।

C) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) नन्दिग्रहिपचादिभ्यः ल्युणिन्यचः इति सूत्रं व्याख्यात।

2) प्रियवशे वदः खच् इति सूत्रं व्याख्यात।

3) सुप्यजातौ णिनिस्ताच्छील्ये इति सूत्रं व्याख्यात।

4) सुकर्मपापमन्त्रपुण्येषु कृञः इति सूत्रं व्याख्यात।

5) कृत्यचः इति सूत्रं व्याख्यात।

D) **द्वयोरेकं समाधत्त।** **10x1=10**

1) वाऽसरूपोऽस्त्रियाम् इति सूत्रं व्याख्यात।

2) पूर्वकृदन्तप्रकरणे युच्प्रत्ययविधायकानि सूत्राणि आलोचयन्तु।

***

# SK-236 लघुसिद्धान्तकौमुदी अजन्तपुंलिङ्गान्ता

कालावधिः- होराद्वयम् पूर्णाङ्काः 50

---

A) **यथेष्टं दश प्रश्नाः समाधेयाः।** **1x10=10**

1) षट् सन्तः अत्र ष्टुत्वं भवति न वा।
2) तत् +मात्रम् अत्र नित्यं सन्धिः उत विकल्पेन।
3) खरि च इति सूत्रस्य अर्थं लिखत।
4) हरिं वन्दे अत्र अनुस्वारः केन।
5) कः संयोगः।
6) नादिचि इति सूत्रं कस्य बाधकम्।
7) अवसानं नाम किम्।
8) एङ्ह्रस्वात्सम्बुद्धेः इति सूत्रस्य अर्थं लिखत।
9) अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इति सूत्रस्य अर्थं लिखत।
10) टिसंज्ञा केन सूत्रेण भवति।
11) पदसंज्ञाविधायकं सूत्रम् किम्।
12) रो रि इति सूत्रस्य अर्थं लिखत।

B) **सप्तसु पञ्चानां समाधानं कार्यम्।** **3x5=15**

1) किं नाम सवर्णम्।
2) स्तोः श्चुना श्चुः इति सूत्रस्य संक्षेपेण व्याख्यानं कुर्वन्तु।
3) वर्णानाम् उच्चारणस्थानानि लेखनीयानि।
4) यरोऽनुनासिकेऽनुनासिको वा इति सूत्रस्य संक्षेपेण व्याख्या कार्या।
5) विसर्जनीयस्य सः इति सूत्रस्य संक्षेपेण व्याख्या कार्या।
6) आमि सर्वनाम्नः सुट् इति सूत्रस्य संक्षेपेण व्याख्या कार्या।
7) रामः इति रूपं साधयत।

C) **पञ्चसु त्रयः प्रश्नाः समाधेयाः।** **5x3=15**

1) ऊकालोऽज्झ्रस्वदीर्घप्लुतः इति सूत्रस्य व्याख्यानं कुर्वन्तु।

2) इको यणचि इति सूत्रस्य व्याख्यानं कुर्वन्तु।

3) भोभगोअघोअपूर्वस्य योऽशि इति सूत्रस्य व्याख्यानं कुर्वन्तु।

4) सर्वे इति रूपं साधयन्तु।

5) रामैः इति रूपं साधयन्तु।

D) **अभीष्टम् एकं व्याख्यात।** **10x1=10**

1) अणुदित्सवर्णस्य चाऽप्रत्ययः इति सूत्रस्य विस्तरेण व्याख्यानं कुर्वन्तु।

2) उदः स्थास्तम्भोः पूर्वस्य इति सूत्रस्य विस्तरेण व्याख्यानं कुर्वन्तु।

***

# SK-239 लघुसिद्धान्तकौमुद्यां कृत्तद्धितौ

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **द्वादशसु दश समाधेयाः।** **1x10=10**

1) स्नानीयं चूर्णम् इत्यत्र कस्मिन्नर्थे अनीयर्-प्रत्ययो वर्तते ?
2) तयोरेव इत्यत्र तयोर्नाम कयोः ?
3) भ्रासभास. इत्यादिसूत्रं पूरयत।
4) वाक् इत्यत्र दीर्घः केन ?
5) साधुः इत्यत्र उण्-प्रत्ययः केन उणादिसूत्रेण ?
6) मायुः नाम किम् ?
7) ल्वादिगणे कति धातवः सन्ति ?
8) उपसमाधानं नाम किम् ?
9) गुरोश्च हलः इत्यनेन कः प्रत्ययो भवति किञ्चोदाहरणम् ?
10) दन्तच्छदः इत्यत्र छादेर्ह्रस्वः केन ?
11) अवस्तारशब्दस्य कोऽर्थः?
12) मायावी इत्यत्र कः मत्वर्थीयप्रत्ययः केन ?

B) **सप्तसु पञ्च समाधेयाः।** **3x5=15**

1) गोत्रसंज्ञां वर्णयत।
2) क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः इत्यादिश्लोकं पूरयित्वा व्याख्यात।
3) चातुरर्थिकप्रकरणस्य चतुरः अर्थान् ससूत्रं सोदाहरणं लिखत।
4) पाकः, शिष्यः - इत्यनयोरेकं रूपं साधयत।
5) दाक्षिः, वैनतेयः - इत्यनयोरेकं रूपं साधयत।
6) ईहा, पण्डितम्मन्यः - इत्यनयोरेकं रूपं साधयत।

7) पक्तिमम्, धौरेयः - इत्यनयोरेकं रूपं साधयत।

C) **पञ्चसु त्रयः समाधेयाः।** **5x3=15**

1) सुप्यजातौ णिनिस्ताच्छील्ये इति सूत्रं व्याख्यात।

2) समर्थानां प्रथमाद्वा इति सूत्रं व्याख्यात।

3) चिकीर्षुः/ गर्गाः इत्यनयोरेकं रूपं साधयत।

4) मतोर्मस्य वविधानं ससूत्रं व्याख्यात।

5) अधोनिर्दिष्टेषु यथेच्छं दशकृत्प्रत्ययानां विधायकसूत्राणि उदाहरणानि च लिखत।

तृन्, षाकन्, इत्रः, कः, अच्, अप्, क्रिः, अथुच्, नन्, नङ्, क्तिन्, युच्, घः।

D) **यथाकाममेकं समाधत्त।** **10x1=10**

1) वासरूपोऽस्त्रियाम् इति सूत्रं व्याख्यात।

2) निष्ठा-अपत्याधिकारप्रकरणयोरेकं प्रकरणं व्याख्यात।

***

# SK-241 महाभाष्ये 2-4 आह्निकानि

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **द्वादशसु दश समाधत्त।** **1x10=10**

1) विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायत इत्यत्र ज्ञापकं किम् ?

2) संज्ञादिषु कथं लृकारोपदेशं विना दोषनिवृत्तिः ?

3) वर्णैकदेशाः वर्णग्रहणेन गृह्यन्ते चेत् के दोषाः ?

4) रेफस्य परोपदेशे के दोषाः।

5) अयोगवाहानामट्सूपदेशः किमर्थः ?

6) ढ्रलोप इति सूत्रे पूर्वेण णकारेण प्रत्याहारः इत्यत्र ज्ञापकं किम्।

7) तद्भावितपदस्य कोऽर्थः।

8) पूर्वोच्चारितः संज्ञी परोच्चारिता संज्ञा। कुत एतत्।

9) कानि शास्त्राणि प्रथन्ते।

10) तदपवादः इति कस्य सूत्रस्य अपवादः।

11) मुखनासिकं वचनमस्येति विग्रहे को दोषः।

12) नासिकाग्रहणस्य किं प्रयोजनम्।

B) **सप्तसु पञ्च समाधत्त।** **3x5=15**

1) आन्यभाव्यं तु कालशब्दव्यवायात्। प्रतिपादयत।

2) एकवर्णवच्च। विचारयत।

3) तुल्यरूपे संयोगे द्विव्यञ्जनविधिः। विवेचयत।

4) वर्णा अनर्थका इति पक्षः प्रतिपाद्यताम्।

5) अणोऽप्रगृह्यस्य इति सूत्रे पूर्वेण णकारेण प्रत्याहारः इति कथं ज्ञायते।

6) वृद्धिसंज्ञा तद्भावितसंज्ञा चेत् के दोषाः।

7) गुणाः अभेदकाः इति पक्षं प्रतिपादयत।

C) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) व्यक्तिपक्षे कथमकारस्यैकत्वम्।

2) पूर्वोपदेशे कित्त्वप्रतिषेधो व्यलोपवचनञ्च। विवेचयत।

3) वर्णानाम् अर्थवत्त्वं यथाभाष्यं प्रतिपादयत।

4) वृद्धिरादैजित्यत्र समुदायसंज्ञानिराकरणं प्रतिपादयत।

5) इको गुणवृद्धी इत्यत्र तदपवादपक्षः।

D) **द्वयोरेकं समाधत्त।** **10x1=10**

1) ऋॢक्सूत्रं भाष्यदिशा व्यख्यात।

2) वृद्धिरादैजित्यत्र तपरकरणप्रयोजनम् भाष्यदिशा निरूपयत।

***

**SK-242 महाभाष्ये 5-7 आह्निकानि**

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **द्वादशसु दश समाधत्त।** **1x10=10**

1) भाष्यकारमते आदिलक्षणं किम् ?
2) व्यपदेशिवद्भावस्य लोकविज्ञानसिद्धौ उदाहरणं किम् ?
3) महत्याः संज्ञायाः करणे किं प्रयोजनम् ?
4) द्व्यन्याय, त्र्यन्याय अत्र कथं संख्यायाः पूर्वनिपातः ?
5) पूर्वादीनां कुत्र सर्वनामसंज्ञा उच्यते ?
6) कृद्यो मान्तः इति पक्षे कुत्र दोषः ?
7) सन्निपातपरिभाषास्वीकारे क्नापयतीत्यत्र कः दोषः ?
8) संप्रसारणसंज्ञा वर्णस्य चेत् कः दोषः ?
9) शब्दः किन्निमित्तकः ?
10) मितः पूर्वान्तत्वे के दोषाः ?
11) षष्ठी स्थानेयोगेति सूत्रस्य भाष्यदृष्ट्या किं प्रयोजनम् ?
12) स्थानेन्तरतमसूत्रं किमाश्रित्य प्रत्याख्यायते ?

B) **सप्तसु पञ्च समाधत्त।** **3x5=15**

1) अपूर्वानुत्तरलक्षणत्वादाद्यन्तयोः सिद्धमेकस्मिन्।
2) अन्याभावो द्विवचनटाब्विषयत्वात्।
3) न बहुव्रीहौ इत्यत्र भूतपूर्वग्रहणानर्थक्यम्।
4) कृन्मेजन्तश्चानिकारोकारप्रकृतिः।
5) विभक्तिविशेषनिर्देशस्तु ज्ञापक उभयसंज्ञात्वस्य।
6) पूर्वान्ते नपुंसकोपसर्जनह्रस्वत्वं द्विगुस्वरश्च।

7) संप्रयोगे वा नष्टाश्वदग्धरथवत्।

C) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) बाधकान्येव निपातनानि।

2) न बहुव्रीहौ। व्याख्यात।

3) सन्निपातपरिभाषासत्त्वे दोषाः के।

4) मिदचोऽन्त्यात्परः इत्यत्र परादिपक्षे दोषान् वर्णयत।

5) स्थानेन्तरतमसूत्रप्रत्याख्यानं यथाग्रन्थं दर्शयत।।

D) **द्वयोरेकं समाधत्त।** **10x1=10**

1) विभाषा दिक्समासे बहुव्रीहौ। व्याख्यात।

2) सन्निपातपरिभाषाप्रयोजनानि दोषनिवारणञ्च यथाग्रन्थं प्रतिपादयत।

***

RKMVERI/DSP/MAIS/20-25/D2023/SK-255

# SK-255 परिभाषेन्दुशेखरे 1 - 50 परिभाषाः

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **द्वादशसु दश समाधत्त।** **1x10=10**

1) अधिकारस्य कति प्रकाराः?
2) अत्र शास्त्रे अण् केन णकारेण?
3) यथोद्देशम् इत्यत्र कः समासः?
4) संख्याया अतिशदन्तायाः इति निषेधः कस्य ज्ञापकः?
5) गुणतः आन्तर्यस्योदाहरणं किम् ?
6) अर्थवत्परिभाषा वर्णग्रहणे प्रवर्तते न वा?
7) स्थानतः आन्तर्यस्योदाहरणं किम् ?
8) किं नाम नित्यत्वम् ?
9) परात् नित्यं बलवत् इत्यस्य उदाहरणं किम् ?
10) किं नाम निर्दिश्यमानत्वम् ?
11) यदागमपरिभाषा नित्या अनित्या वेति ?
12) शित् इत्यस्य विग्रहः कः ?

B) **सप्तसु पञ्च समाधत्त।** **3x5=15**

1) अनुबन्धानाम् एकान्तत्वं यथाग्रन्थं साधयन्तु।
2) नानुबन्धकृतमनेजन्तत्वमिति परिभाषां व्याकुरुत।
3) नानुबन्धकृतमसारूप्यमिति परिभाषां लिखन्तु।
4) प्रनिदारयतीत्यादौ घुत्वं कुतो नेति प्रतिपादयत।
5) वर्णग्रहणे यदागमपरिभाषा प्रवर्तते नवेति वर्णयत।
6) नागेशभट्टनये सकृद्गतिन्यायस्य कथं सिद्धिः इति लिखत।

7) भट्टोजिदीक्षितनये पुनः प्रसङ्गविज्ञानात्सिद्धमिति कथं सिध्यतीति वर्णयत।

C) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) कार्यकालं संज्ञापरिभाषम् इति परिभाषां निरूपयत।

2) व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणमिति परिभाषां वर्णयत।

3) प्रत्ययग्रहणे चापञ्चम्याः इति परिभाषां प्रतिपादयत।

4) संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्तीति परिभाषां प्रतिपादयत।

5) अत्राङ्गशब्देन शब्दरूपं निमित्तमेव गृह्यते इति ग्रन्थस्याशयं प्रकाशयत।

D) **द्वयोरेकं समाधत्त।** **10x1=10**

1) अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम् इति परिभाषां यथाग्रन्थं प्रकाशयन्तु।

2) यथोद्देशं संज्ञापरिभाषम् इति परिभाषां यथाग्रन्थं सविस्तरं प्रतिपादयत।

***

# SK-265 लघुशब्देन्दशेखर आदितो न पदान्तद्विरिति सूत्रं यावत्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **द्वादशसु दश समाधत्त।** **1x10=10**

1) लघुशब्देन्दुशेखरम् इत्यस्य विग्रहं लिखत ।

2) अइउण् इत्यादीनां कथं सञ्ज्ञासूत्रत्वम् ?

3) थमोः उकारः कथं चरितार्थः ?

4) ऊकालसूत्रे कालग्रहणस्य किं फलं भाष्ये उक्तम् ?

5) भूवादिसूत्रे वा ग्रहणाभावे क्व दोषः ?

6) नाज्झलौ इत्यत्र आकारप्रश्लेषे किं लिङ्गम् ?

7) दीक्षितमते उपदेशशब्दार्थः कः ?

8) शिक्षायां कवर्गस्य उच्चारणस्थानं किमुक्तम्?

9) आकारहकारयोः सावर्ण्ये हो ढ इति कस्योपलक्षणम्?

10) अनल्विधौ इत्यस्य कोऽर्थः ?

11) स्थानिवत्सूत्रेण कीदृशोऽतिदेशो विधीयते ?

12) न पदान्तद्विरित्यत्र विधिशब्दे कः प्रत्ययः ?

B) **सप्तसु पञ्च समाधत्त।** **3x5=15**

1) उपजीव्यविरोधात् सन्धिर्न इति मतं दूषयत।

2) ऐ औ च् सूत्रस्य वैयर्थ्यम् उपपादयत।

3) एकान्ताः अनुबन्धा इति पक्षं निरूपयत ।

4) अनुबन्धाः महेश्वरकृताः इति प्रमाणयत ।

5) हशादिषु कुतो न टग्रहणम् ?

6) ऋक्तन्त्रव्याकरणे शाकटायनः किम् आह ?

7) भूवादि सूत्रं व्याख्यात ।

C) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) सवर्णसंज्ञायां यावदास्यभवतुल्यं ग्राह्यमिति यथाग्रन्थं निरूपयत।

2) तपरस्तत्कालस्य इति सूत्रं व्याख्यात।

3) येन विधिस्तदन्तस्य इति सूत्रं व्याख्यात।

4) रप्रत्याहारं सप्रमाणं खण्डयत।

5) इको गुणवृद्धी सूत्रं यथाग्रन्थं निरूपयत।

D) **द्वयोरेकं समाधत्त।** **10x1=10**

1) पूर्वत्रासिद्धमिति सूत्रं यथाग्रन्थं व्याख्यात।

2) न पदान्तद्विरिति सूत्रं यथाग्रन्थं व्याख्यात।

***

## SK-273 वैयाकरणभूषणसारे आदितो नामार्थप्रकरणं यावत्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **द्वादशसु दश समाधत्त।** **1x10=10**

1) कति स्फोटाः?
2) एकार्थीभावरूपं सामर्थ्यं कुत्र?
3) भूतपूर्वः इत्यत्र कः समासः?
4) भूषणसारस्य दर्पणटीकाकारः कः?
5) प्राचीनानुसारं तत्पुरुषलक्षणं किम्?
6) नैयायिकमते शक्तिलक्षणं किम् ?
7) न्यायमते तत्पुरुषे कुत्र लक्षणा ?
8) न्यायनये चादयो वाचकाः द्योतकाः वा ?
9) आक्षिकशब्दस्य विग्रहः कः?
10) घृतघटः इत्यस्यार्थः कः?
11) अनुदरा कन्या इत्यत्र नञर्थः कः?
12) घटो नास्ति इति वाक्यस्यार्थः कः?

B) **सप्तसु पञ्च समाधत्त।** 3x5=15

1) अजहत्स्वार्थापक्षं प्रकाशयन्तु।
2) एकार्थीभावस्वीकारे मानं प्रदर्शयन्तु।
3) किं चैवं चित्रगुमानय इत्यादौ कर्मत्वाद्यनन्वयापत्तिरिति ग्रन्थस्याशयं लिखत।
4) प्राचीनोक्तानाम् अव्ययीभावादीनां लक्षणानि प्रतिपादयत।
5) समासे विशिष्टशक्त्यस्वीकारे राजपुरुषः इत्यादौ अनन्वयप्रसङ्गः कथमिति लिखत।
6) निपातानां वाचकत्वे काव्यादावन्वयो न स्यादिति ग्रन्थस्य तात्पर्यं लिखत।

7) नञ्समासे चापरस्य द्योत्यं प्रत्येव मुख्यतेति ग्रन्थस्य तात्पर्यं लिखन्तु।

C) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) भेदः संसर्ग उभयञ्चेति वाच्यव्यवस्थितेः इति कारिकां व्याख्यात।

2) अषष्ठ्यर्थबहुव्रीहौ व्युत्पत्त्यन्तरकल्पनेति कारिकायाः तात्पर्यं लिखत।

3) चादीनां द्योतकत्वं प्रतिपादयत।

4) बहूनां वृत्तिधर्माणां वचनैरेव साधने....इति ग्रन्थस्याशयं प्रकाशयत।

5) नञ्समासे चापरस्य प्राधान्यात् सर्वनामतेति ग्रन्थस्याशयं लिखत।

D) **द्वयोरेकं समाधत्त।** **10x1=10**

1) समासः षड्विधो बुधैरिति कारिकां यथाग्रन्थं वर्णयन्तु।

2) भूषणसारदिशा शक्तिस्वरूपं सविस्तरं प्रतिपादयत।

***

**SK-275 प्रौढमनोरमायां कारकम् ।**

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **द्वादशसु दश समाधत्त।** **1x10=10**

1) अभेदसंसर्गेण इत्यनेन किं विवक्षितम् ?

2) प्रकृतिप्रत्यययोरभेदान्वयः क्व दृष्टः ?

3) राम मां पाहीति वाक्यात् कः शाब्दबोधः शब्दरत्नकारमते ?

4) कारके इत्यत्र कस्मिन्नर्थे सप्तमी ?

5) शब्दरत्नकारमते प्रातिपदिकार्थः कः ?

6) ग्रामेवासः इत्यादावधिकरणकारकसञ्ज्ञयोः समावेशफलं किम् ?

7) कारकशब्दः क्रियापरः कया व्युत्पत्या भवति ?

8) शब्दाध्याहारवादे कर्मत्वं संसर्ग एव न प्रकारः कुतः ?

9) प्रधानकर्मत्वं परिष्कुरुत ।

10) शब्दरत्नकारमते ध्रुवत्वं परिष्कुरुत ।

11) धायैरामोदमुत्तममिति कथं सङ्गच्छते ?

12) गां दोग्धि पयः इत्यस्य दीक्षितमते कोऽर्थः ?

B) **सप्तसु पञ्च समाधत्त।** **3x5=15**

1) सुबन्तं हि यथा .......तिङन्तस्य विशेषणमिति कारिकां व्याख्यात ।

2) पश्य मृगो धावतीति सप्रसङ्गं व्याख्यात ।

3) प्राचां मते प्रातिपदिकार्थः कः यथाग्रन्थं लिखत ।

4) इष्यते पुत्र इत्यर्थे क्यच् कुतो न सप्रसङ्गं लिखत ।

5) क्रियायाः परिनिष्पत्तिर्यद्व्यापरादनन्तरमिति कारिकां विलिख्य व्याख्यात ।

6) उभयप्राप्तौ कर्मणि सूत्रं यथाग्रन्थं व्याख्यात।

7) अपाये यदुदासीनं चलं वा इति कारिकां विलिख्य व्याख्यात ।

C) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) प्रत्ययनियमं यथाग्रन्थं लिखत ।

2) यस्य च भावेन भावलक्षणमिति सूत्रं यथाग्रन्थं निरूपयत ।

3) कर्तृकर्मणोः कृतिः इति सूत्रं यथाग्रन्थं व्याख्यात ।

4) कर्मलक्षणं यथाग्रन्थं परिष्कुरुत ।

5) रुच्यर्थानां प्रीयमाणः इति सूत्रं व्याख्यात ।

D) **द्वयोरेकं समाधत्त।** **10x1=10**

1) अनिभिहिते इति सूत्रं यथाग्रन्थं व्याख्यात ।

2) अकथितञ्च इति सूत्रं यथाग्रन्थं निरूपयत ।

***

# SK-281 वाक्यपदीयम्

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **द्वादशसु दश समाधत्त।** **1x10=10**

1) ब्रह्मणः प्राप्त्युपायः कः ?
2) अत्रातीतविपर्यासः केवलामनुपश्यति। कुत्र ?
3) प्रयोजनस्य भेदद्वयं किम् ?
4) पितृरक्षपिशाचादीनां कीदृशाः शक्तयः ?
5) शब्दे कयोः रूपं प्रकाशते ?
6) कदा संज्ञा रूपपदार्थिका ?
7) ह्रस्वदीर्घादयः कस्य ध्वनेः भेदः ?
8) जातिः संज्ञा इति पक्षे कथं व्यक्तिः प्रतिपद्यते ?
9) विषयस्य संस्कारः इत्यस्योदाहरणं किम् ?
10) कीदृशः वायुः शब्दो भवति ?
11) असाधवः कुतः साक्षादवाचकाः ?
12) के साधुष्वनुमानेन प्रत्ययोत्पत्तिं कुर्वन्ति ?

B) **सप्तसु पञ्च समाधत्त।** **3x5=15**

1) अध्याहिकलां यस्य कालशक्तिमुपाश्रिताः।
   जन्मादयो विकाराः षड् भावभेदस्य योनयः।।
2) नित्याः शब्दार्थसम्बन्धास्तत्राम्नाता महर्षिभिः।
   सूत्राणामनुतन्त्राणां भाष्याणाञ्च प्रणेतृभिः।।
3) परेषामसमाख्येयमभ्यासादेव जायते।
   मणिरूप्यादिविज्ञानं तद्विदां नानुमानिकम्।।
4) स्वं रूपमिति कैश्चित्तु व्यक्तिः संज्ञोपदिश्यते।

जातेः कार्याणि संसृष्टा जातिस्तु प्रतिपद्यते।।

5) इन्द्रियस्यैव संस्कारः समाधानाञ्जनादिभिः।

विषयस्य तु संस्कारस्तद्गन्धप्रतिपत्तये।।

6) वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते।

कैश्चित् दर्शनभेदो हि प्रवादेष्वनवस्थितः।।

7) अम्बाम्बेति यथा बालः शिक्षमाणः प्रभासते।

अव्यक्तं तद्विदां तेन व्यक्ते भवति निश्चयः।।

C) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) शब्दब्रह्मणः स्वरूपं यथाग्रन्थं निरूपयत।
2) शब्दार्थयोः भेदद्वयं वाक्यपदीयदिशा व्याख्यात।
3) अभ्यासादृष्टयोः प्रामाण्यं ग्रन्थदिशा निरूपयत।
4) स्वं रूपमित्यस्य जातिव्यक्तिभेदेन व्याख्यात।
5) अणोः शब्दत्वेन परिणामः कथमिति प्रतिपादयत।

D) **द्वयोरेकं समाधत्त।** **10x1=10**

1) शब्दस्य ग्राह्यत्वं ग्राहकत्वं च ग्रन्थोक्तं वर्णयत।
2) अपभ्रंशविचारं यथाग्रन्थं लिखत।

***

RKMVERI/DSP/MAIS/20-25/D2023/SK-311

## SK-311 अर्थसङ्ग्रहः

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **द्वादशसु दश समाधत्त।** **1x10=10**

1) अर्थसङ्ग्रहरीत्या धर्मलक्षणं किम् ?
2) शाब्दीभावना केन अंशेनोच्यते ?
3) आर्थीभावनायां करणं किम् ?
4) वेदः कः?
5) विनियोगविधिः कः ?
6) विकृतिः का ?
7) अवान्तरप्रकरणं केन ज्ञायते ?
8) क्रमः कः ?
9) स्थानक्रमस्य उदाहरणं किम् ?
10) अधिकारविधिः कः?
11) परिसंख्याविधिः कः ?
12) अर्थवादः कः?

B) **सप्तसु पञ्च समाधत्त।** **3x5=15**

1) शाब्दीभावनायाः तथाविधव्यवहारहेतुः कः?
2) उत्पत्तिविधिः कः? सोदाहरणं निरूपयत?
3) द्वितीयाविभक्तिश्रुत्युदाहरणं विवृणुत?
4) समाख्या का? निरूपयत?
5) क्रमविधायकश्रुतिप्रमाणं सोदाहरणं निरूपयत ?
6) अर्थक्रमलक्षणं सोदाहरणं निरूपयत?

7) परिसङ्ख्यायाः दोषत्रयं निरूपयत।

C) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) शाब्दीभावनायाः अंशत्रयं विवृणुत ।

2) लिङ्गस्वरूपं विवृणुत।

3) सन्दंशम् उदाहरणपूर्वकं विवृणुत।

4) स्थानक्रमः कः? सोदाहरणं वर्णयत ।

5) मन्त्रस्वरूपं वर्णयत।

D) **द्वयोरेकं समाधत्त।** **10x1=10**

